[८८७] आभीक्ष्ण्ये द्वे भवत इति वक्तव्यम् । (म. भा. ३. ३७०)

भुक्त्वा भुक्त्वा व्रजति । [1]भोजं भोजं व्रजति । [2]नित्य (८.१.४/२१४०) इत्येव [3]सिद्धम् इति [4]तत्रोक्तम् ।

[८८८] डाचि द्वे भवत इति वक्तव्यम् । (म. भा. ३. ३७०)

पटपटाकरोति । पटपटायते[5] । अव्यक्तानुकरणे डाजन्तस्य द्विर्वचनमिष्यते । इह न भवति, द्वितीयाकरोति, तृतीयाकरोति । तदर्थं केचित् 'डाचि बहुलम्' इति पठन्ति ।

[८८९] पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति वक्तव्यम् । (म. भा. ३. ३७०)

पूर्वं पूर्वं पुष्प्यन्ति । प्रथमं प्रथमं पच्यन्ते । [6]आतिशयिकोऽपि दृश्यते, पूर्वतरं पुष्प्यन्ति, प्रथमतरं पच्यन्ते इति ।

[८९०] डतरडतमयोः समसम्प्रधारणयोः स्त्रीनिगदे भावे द्वे भवत इति वक्तव्यम् । (म. भा. ३. ३७०)

उभाविमावाढ्यौ । [7]कतरा कतरा अनयोराढ्यता । सर्वं इमे आढ्याः । [8]कतमा कतमा एषामाढ्यता । डतरडतमाभ्यामन्यत्रापि हि दृश्यते । उभाविमौ आढ्यौ । कीदृशी कीदृशी अनयोराढ्यता । तथा स्त्रीनिगदाद्भावात् [9]अन्यत्रापि हि दृश्यते, उभाविमावाढ्यौ, कतरः कतरोऽनयोर्विभवः इति ।

[८९१] कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलम् । (म. भा. ३. ३७०)

यदा न समासवत् प्रथमैकवचनं तदा पूर्वपदस्य (म. भा. ३. ३७०)

[10]अन्यमन्यमिमे ब्राह्मणा भोजयन्ति, [11]अन्योन्यमिमे ब्राह्मणा भोजयन्ति । अन्योन्यस्य ब्राह्मणा भोजयन्ति । इतरेतरं भोजयन्ति । इतरेतरस्य भोजयन्ति ।

[८९२] स्त्रीनपुंसकयोरुत्तरपदस्य चाम्भावो वक्तव्यः । (म. भा. ३. ३७०)

अन्योऽन्यामिमे ब्राह्मण्यौ भोजयतः । अन्योन्यं भोजयतः । इतरेतरां भोजयतः । इतरेतरं भोजयतः । अन्योन्यामिमे ब्राह्मणकुले भोजयतः । इतरेतरामिमे ब्राह्मणकुले भोजयतः । इतरेतरमिमे ब्राह्मणकुले भोजयतः ॥

---

1. उदाहरणमिदं नास्ति इ. 2. नित्यम् इत्येवासिद्धम् इ. 3. तु इत्यधिकम् ह. 4. अत्रोक्तम् क. इ, पूर्वं नोक्तम् ह, नोक्तम् ब. 5. दमदमाकरोति दमदमायते इत्यधिकम् क. इ. ब. ड. 6. अतिशायिकोऽपि क, ड. ब. ह, अतिशायनिको इ. 7. कतरा क. 8. कतरकतमा ह. 9. अन्यत्र दृश्यते ब. 10. उदाहरणमिदं नास्ति क. इ. 11. अन्योन्यमेव इ.